# Shri Svaminarayana Stotram

# શ્રીસ્વામિનારાયણસ્તોત્રમ્

## Document Information

Text title : Shri Svaminarayana Stotram

File name : svAminArAyaNastotram.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, deities_misc, stotra

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીસ્વામિનારાયણસ્તોત્રમ્

ઊર્ધ્વં તથાધો નહિ યસ્ય માનં તસ્મિન્ મહોધામનિ રાજમાનમ્ ।
મુક્તવ્રજાનામધિરાજમાનં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૧॥

બ્રહ્માણ્ડસન્દોહવિભાસિકાન્તિં નૈકાત્મકલ્યાણનિગૂઢકાન્તિમ્ ।
મનુષ્યરૂપાર્પિતદિવ્યશાન્તિં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૨॥

મનુષ્યરૂપં પ્રતિમાસ્વરૂપં તથાક્ષરે ધામનિ દિવ્યરૂપમ્ ।
યસ્યાસ્ત્યભિન્નં કમનીયરૂપં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૩॥

દિવ્યામ્બરાભૂષણભૂષિતાઙ્ગં દિવ્યાદ્વિતીયાકૃતિમઞ્જુલાઙ્ગમ્ ।
દિવ્યત્વસમ્પાદકસઙ્ગિસઙ્ગં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૪॥

સ્વસ્વામિનારાયણનામમન્ત્રં સ્વયં દિશન્તં ભવપારયન્ત્રમ્ ।
પ્રૌઢપ્રતાપાશ્રિતલોકતન્ત્રં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૫॥

યોગાદ્વિના કારિતસત્સમાધિં સદ્ભક્તસઙ્ઘાતવિનાશિતાધિમ્ ।
સમ્પ્રાપયન્તં તમનાદ્યુપાધિં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૬॥

સર્વાવતારાન્ પ્રવિલાપયન્તં સર્વાવતારિત્વમહો ધરન્તમ્ ।
સ્વરાડિતિ સ્વાન્ પરિદર્શયન્તં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૭॥

માયે શબ્રહ્માક્ષરસઙ્ઘબીજં યેડનાદિમુક્તા અપિ તેષુ બીજમ્ ।
તં સર્વદાત્યન્તિકમુક્તિબીજં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૮॥

પ્રત્યક્ષ એવાસ્મિ સદેતિ ભાનં દત્વા સ્વકેભ્યો નિજમૂર્તિદાનમ્ ।
યાવદ્રવીન્દૂ પ્રકટપ્રમાણં શ્રીસ્વામિનારાયણમાનમામિ ॥ ૯॥

ઇતિ શ્રીસ્વામિનારાયણ ગાદી-આદ્યાચાર્યપ્રવર
શ્રીમુક્તજીવનસ્વામિબાપાવિરચિતં શ્રીસ્વામિનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Svaminarayana Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*